# भक्तिलक्षणविचारः

डॉ. जि. नरसिंहुलु
सहायकाचार्यः
अद्वैतवेदान्तविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
एकलव्यपरिसरः
अगरतला, त्रिपुरा

**प्रस्तावः -** मानवजीवनसाफल्याय अस्माकं पूर्वजैः तपोनिधिभिः महर्षिभिः धर्म-अर्थ-काम-मोक्षाख्याः चतुर्विधपुरुषार्था उपदिष्टाः। एतान् पुरुषार्थान् अधिगन्तुं कर्म-भक्ति- ज्ञानमिति त्रयः मार्गा अपि तैः प्रदर्शिताः । एवंविधेषु पुरुषार्थसाधकेषु त्रिषु मार्गेषु भगवत्तत्त्वप्रबोधकः भक्तिमार्गः विशिष्यते । उक्तं च वासुदेवेन **भक्त्या त्वनन्यया शक्यः अहमेवंविधोऽर्जुन**(भ.गी.11.54) इति । नैकेषु ग्रन्थेषु भक्तिलक्षणानि वयं द्रष्टुं शक्नुमः । यथा **सा परानुरक्तिः ईश्वरे** (शाण्डिल्यसूत्राणि-1.1.2), **सा त्वस्मिन् परमप्रेमरूपा** (नारदभक्तिसूत्राणि.2), **स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते** (विवेकचूडामणिः-32) इत्यादि । यद्यपि भक्तिविषये अनेकानि निर्वचनानि लभ्यन्ते तथापि श्रीशङ्करभगवत्पादैः **शिवानन्दलहर्याम्** उक्तः श्लोकः अनुपमः अद्वितीयश्च परिलक्ष्यते । तदत्र वयं विचारयामः ।

# विषयोपस्थापनम्

**श्लोकः-**

अङ्कोलं  निजबीजसन्ततिरयस्कान्तोपलं सूचिका
साध्वी नैजविभुं लताक्षितिरुहं सिन्धुस्सरिद्वल्लभम् ।
प्राप्नोतीह यथा तथा पशुपतेः पादारविन्दद्वयं
चेतोवृत्तिरुपेत्य तिष्ठति  सदा सा भक्तिरित्युच्यते ॥

(शिवानन्दलहरी.61)

## पदविभागः-

अङ्कोलं- निजबीजसन्ततिः- अयस्कान्तोपलं- सूचिका
सध्वी- नैजविभुं- लता- क्षितिरुहं- सिन्धुः-सरिद्वल्लभम् ।
प्राप्नोति- इह- यथा- तथा- पशुपतेः- पादारविन्दद्वयं
चेतोवृत्तिः-उपेत्य- तिष्ठति-सदा- सा- भक्तिः- इति- उच्यते ॥

## अन्वयः-

इह लोके अङ्कोलं निजबीजसन्ततिः, अयस्कान्तोपलं सूचिका, नैजविभुं साध्वी, क्षितिरुहं लता, सरिद्वल्लभं सिन्धुः यथा प्राप्नोति तथा चेतोवृत्तिः पशुपतेः पादारविन्दद्वयम् उपेत्य सदा तिष्ठति, तदा सा भक्तिरित्युच्यते ।

## अङ्कोलं निजबीजसन्ततिः-

इह लोके यथा अङ्कोलवृक्षस्य निजबीजसन्ततिः स्वकीयबीजानि सर्वदा तं वृक्षमाश्रित्यैव तिष्ठन्ति। अर्थात् अधः पतित्वापि स्वमूलं वृक्षं परित्यज्य कदापि स्थातुं नेच्छन्ति।



## अयस्कान्तोपलं सूचिका

इह लोके यथा सूचिका अयस्कान्तोपलं आश्रित्यैव सततं तिष्ठति । अर्थात् अयस्कान्तोपलसकाशे विद्यमाना सूचिका कदाचिदपि तस्मात् विच्छेदं न सहते ।



# साध्वी नैजविभुम् -

इहलोके यथा साध्वी पतिव्रता स्त्री सर्वदा नैजविभुं सद्गुणसम्पन्नं स्वपतिमेव चिन्तयति । अर्थात् कदाचिदपि स्वभर्तारं विना अन्यं स्व मनःपटले नानयति ।



## लता क्षितिरुहम् -

इहलोके यथा विभिन्नाः लताः क्षितिरुहं कमपि वृक्षं, काष्ठविशेषं वा आश्रित्यैव तिष्ठन्ति । अर्थात् स्वाश्रयं विना कदापि स्थातुं नेच्छन्ति ।



# सिन्धुः सरिद्वल्लभम् -

इह लोके यथा सिन्धुः नदी सरिद्वल्लभं जलनिधिं सागरं प्राप्तुम् अविश्रान्ततया प्रवहमाना भवति । अर्थात् नदीजलं सागरं प्राप्तुं सततं प्रवहति । सागरं प्राप्यैव शान्तिमेति ।



तथा तद्वदेव यदा अस्माकं चेतोवृत्तिः मनोवृत्तिः पशुपतेः ईश्वरस्य पादारविन्दद्वयं चरणयुगलम् उपेत्य प्राप्य सदा सर्वदा तिष्ठति, तदा सा एव भक्तिरिति उच्यते । भक्तिरिति कीर्त्यते । तथा चोक्तं भगवत्पादैः **मोक्षसाधनसामग्र्यां भक्तिरेव गरीयसी** इति ।



# धन्यवादः